श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विष्णुधर्मोत्तरान्तर्गतः

# ॥ श्री माङ्गल्यस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री माङ्गल्यस्तवः ॥

दाल्भ्यः

कार्यारम्भेषु सर्वेषु दुस्स्वप्नेषु च सत्तम।
अमङ्गल्येषु दृष्टेषु यज्जप्तव्यं तदुच्यताम् ॥ 1 ॥

येनारम्भाश्च सिद्ध्यन्ति दुस्स्वप्नश्चोपशान्तये।
अमङ्गळानां दृष्टानां परिहारश्च जायते ॥ 2 ॥

श्रीपुलस्त्यः

जनार्दनं भूतपतिं जगद्गुरुं
स्मरन् मनुष्यस्सततं महामुने।
दुष्टान्यशेषाण्यपहन्ति साधयति
अशेषकार्याणि च यान्यभीप्सति ॥ 3 ॥

शृणुष्व चान्यद् गदतो ममाखिलं
वदामि यत्ते द्विजवर्य मङ्गळम्।
सर्वार्थसिद्धिं प्रददाति यत्सदा
निहन्त्यशेषाणि च पातकानि ॥ 4 ॥

प्रतिष्ठितं यत्र जगच्चराचरं
जगत्त्रये यो जगतश्च हेतुः।
जगच्च पात्यत्ति च यस्स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ 5 ॥

व्योमाम्बुवाय्वग्निमहीस्वरूपैः
विस्तारवान् योऽणुतरोऽणुभावात्।
अस्थूलसूक्ष्मस्सततं परेश्वरो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **6** ॥

यस्मात्परस्मात्पुरुषादनन्तात्
अनादिमध्यादधिकं न किञ्चित्।
स हेतुहेतुः परमेश्वरेश्वरो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **7** ॥

हिरण्यगर्भाच्युतरुद्ररूपी
सृजत्यशेषं परिपाति हन्ति।
गुणाग्रणीर्यो भगवान् स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **8** ॥

परस्सुराणां परमोऽसुराणां
परो यतीनां परमो मुनीनाम्।
परस्समस्तस्य च यस्स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **9** ॥

ध्यातो मुनीनामपकल्मषैर्यो
ददाति मुक्तिं परमेश्वरेश्वरः।
मनोऽभिरामः पुरुषस्स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **10** ॥

सुरेन्द्रवैवस्वतवित्तपाम्बुप
स्वरूपरूपी परिपाति यो जगत्।
स शुद्धशुद्धः परमेश्वरेश्वरो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **11** ॥

यन्नामसङ्कीर्तनतो विमुच्यते
    ह्यनेक जन्मार्जितपापसञ्चयात्।
पापेन्धनाग्निस्स सदैव निर्मलो
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ 12 ॥

येनोद्धृतेयं धरणी रसातलात्
    अशेषसृष्टिस्थिति कारणादिकम्।
बिभर्ति विश्वं जगतस्स मूलं
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ 13 ॥

पादेषु वेदा जठरे चराचरं
    रोमस्वशेषा मुनयो मुखे मखाः।
यस्येश्वरेशस्य स सर्वदा प्रभुः
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ 14 ॥

समस्त यज्ञाङ्गमयं वपुः प्रभोः
    यस्याङ्गमीशेश्वरसंस्तुतस्य।
वराहरूपी भगवान् स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ 15 ॥

विक्षोभ्य सर्वोदधितोय संभवं
    दधार धात्रीं जगतश्च यो भुवम्।
यज्ञेश्वरो यज्ञपुमान् स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ 16 ॥

पाताळमूलेश्वरभोगिसंहतो
    विन्यस्य पादौ पृथिवीं च बिभ्रतः।
यस्योपमानं न बभूव सोऽच्युतो
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ 17 ॥

सघर्घरं यस्य च बृंहितं मुहुः
सनन्दनाद्यैर्जनलोकसंश्रितैः।
श्रुतं जयेत्युक्तिपरैस्स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **18** ॥

एकार्णवाद्यस्य महीयसो महीम्
आदाय वेगेन खमुत्पतिष्यतः।
नतं वपुर्योगिवरैस्स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **19** ॥

हतो हिरण्याक्षमहासुरः पुरा
पुराणपुंसा परमेण येन।
वराहरूपस्स पतिः प्रजापतिः
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **20** ॥

दंष्ट्राकरालं सुरभीतिनाशकं
कृतं वपुर्दिव्यनृसिंहरूपिणा।
त्रातुं जगद्येन स सर्वदा प्रभुः
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **21** ॥

दैत्येन्द्रवक्षस्स्थलदारदारुणैः
करेरुहैर्यः क्रकचानुकारिभिः।
चिच्छेद लोकस्य भयानि सोऽच्युतो
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **22** ॥

दन्तान्तदीप्तद्युतिनिर्मलानि यः
चकार सर्वाणि दिशां मुखानि।
निनाद वित्रासितदानवो ह्यसौ
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **23** ॥

यन्नामसङ्कीर्तनतो महाभयात्
    विमोक्षमाप्नोति न संशयं नरः।
स सर्वलोकार्तिहरो नृकेसरी
    ममास्तु माङ्गळ्यविवृद्धये हरिः॥ **24** ॥

सटाकराळभ्रमणानिलाहताः
    स्फुटन्ति यस्याम्बुधराः समन्ततः।
स दिव्यसिंहः स्फुरितानलेक्षणो
    ममास्तु माङ्गळ्यविवृद्धये हरिः॥ **25** ॥

यदीक्षणज्योतिषि रश्मिमण्डलं
    प्रलीनमीषन्न रराज भास्वतः।
कुतः शशाङ्कस्य स दिव्यरूपधृक्
    ममास्तु माङ्गळ्यविवृद्धये हरिः॥ **26** ॥

अशेषदेवेशनरेश्वरेश्वरैः
    सदा स्तुतं यच्चरितं महाद्भुतम्।
स सर्वलोकार्तिहरो महाहरिः
    ममास्तु माङ्गळ्यविवृद्धये हरिः॥ **27** ॥

द्रवन्ति दैत्याः प्रणमन्ति देवताः
    नश्यन्ति रक्षांस्यपयान्ति चारयः।
यत्कीर्तनात् सोऽद्भुतरूपकेसरी
    ममास्तु माङ्गळ्यविवृद्धये हरिः॥ **28** ॥

ऋक्पावितं यो यजुषा हि श्रीमत्
    सामध्वनिध्वस्तसमस्तपातकम्।
चक्रे जगद्वामनकस्स सर्वदा
    ममास्तु माङ्गळ्यविवृद्धये हरिः॥ **29** ॥

यत्पादविन्यासपवित्रतां मही
    ययौ वियच्चर्य्यजुषामुदीरणात्।
स वामनो वामशरीररूपधृक्
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **30** ॥

यस्मिन् प्रयातेऽसुरभूभृतोऽध्वरात्
    ननाम खेदादवनिस्ससागरा।
स वामनस्सर्वजगन्मयस्सदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **31** ॥

महाद्भुते दैत्यपतेर्महाध्वरे
    यस्मिन् प्रविष्टे क्षुभितं महासुरैः।
स वामनोऽन्तस्स्थित सप्तलोकधृक्
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **32** ॥

सङ्घैस्सुराणां दिवि भूतलस्थितैः
    तथा मनुष्यैर्गगने च खेचरैः।
स्तुतः क्रमाद्यः प्रचचार सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **33** ॥

क्रान्त्वा धरित्रीं गगनं तथा दिवं
    मरुत्पतेर्यः प्रददौ त्रिविष्टपम्।
स देवदेवो भुवनेश्वरेश्वरो
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **34** ॥

अनुग्रहं चापि बलेरनुत्तमं
    चकार यश्चन्द्रपदोपमं क्षणात्।
सुरांश्च यज्ञांशभुजस्स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **35** ॥

रसातलाद्येन पुरा समाहृताः
समस्तवेदा जलचाररूपिणा।
स कैटभारिर्मधुहाम्बुशायी
ममास्तु माङ्गल्यविवृद्धये हरिः॥ 36 ॥

निःक्षत्रियां यश्च चकार मेदिनीम्
अनेकशो बाहुवनं तथाऽच्छिनत्।
यः कार्तवीर्यस्य स भार्गवोत्तमो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ 37 ॥

निहत्य यो वालिनमुग्रविक्रमं
निबध्य सेतुं जलधौ दशाननम्।
जघान चान्यान् रजनीचरानसौ
ममास्तु माङ्गल्यविवृद्धये हरिः॥ 38 ॥

चिक्षेप बालश्शकटं बभञ्ज यो
यमार्जुनं कंसमरिं जघान च।
ममर्द चाणूरमुखान् स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ 39 ॥

प्रातस्सहस्रांशुमरीचि निर्मलं
करेण बिभ्रद्भगवान् सुदर्शनम्।
कौमोदकीं चापि गदामनन्तो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ 40 ॥

हिमेन्दुकुन्दस्फटिकाभनिर्मलं
मुखानिलापूरितमीश्वरेश्वरः।
मध्याह्नकालेपि स शङ्खमुद्वहन्
ममास्तु माङ्गल्यविवृद्धये हरिः॥ 41 ॥

तथाऽपराह्णे प्रविकासि पङ्कजं
वक्षस्स्थलेन श्रियमुद्वहन् हरिः।
विस्तारिपद्मायत पत्रलोचनो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **42** ॥

सर्वेषु कालेषु समस्तदेशेषु
अशेषकार्येषु तथेश्वरेश्वरः।
सर्वैस्स्वरूपैर्भगवाननादिमान्
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **43** ॥

### फलश्रुतिः

एतत्पठन् दाल्भ्य समस्तपापैः
विमुच्यते विष्णुपरो मनुष्यः।
सिद्ध्यन्ति कार्याणि तथास्य सर्वान्
अर्थानवाप्नोति यथेच्छते तान्॥ **44** ॥

दुःस्वप्नः प्रशममुपैति पठ्यमाने
स्तोत्रेऽस्मिन् श्रवणविधौ सदोद्यतस्य।
प्रारम्भो द्रुतमुपयाति सिद्धिमीशः
पापानि क्षपयति चास्य देवदेवः॥ **45** ॥

माङ्गल्यं परमपदं सदार्थसिद्धिं
निर्विघ्नामधिकफलां श्रियं ददाति।
किं लोके तदिह परत्र चापि पुंसां
यद्विष्णुप्रवणधियां न दाल्भ्य साध्यम्॥ **46** ॥

देवेन्द्रस्त्रिभुवनमर्थमेकपिङ्गः
संसिद्धिं त्रिभुवनगां च कार्तवीर्यः।

वैदेहः परमपदं प्रसाद्य विष्णुं
संप्राप्तस्सकलफलप्रदो हि विष्णुः ॥ **47** ॥

सर्वारम्भेषु दाल्भ्यैतद् दुस्स्वप्नेषु च पण्डितः।
जपेदेकमना विष्णौ तथाऽमङ्गल्यदर्शने ॥ **48** ॥

शमं प्रयान्ति दुष्टानि ग्रहपीडाश्च दारुणाः।
कर्मारम्भाश्च सिद्ध्यन्ति पुण्यमाप्नोति चोत्तमम् ॥ **49** ॥

हरिर्ददाति भद्राणि माङ्गल्यस्तुति संस्तुतः।
करोत्यखिलरूपैस्तु रक्षामक्षतशक्तिभृत् ॥ **50** ॥

॥ श्री माङ्गल्यस्तवः समाप्तः ॥